# Draunikritam Rudra Stotram

# द्रौणिकृतं रुद्रस्तोत्रम्

## Document Information

Text title : Draunikritam Rudra Stotram

File name : drauNikRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | sauptikaparva | adhyAya 7/2-11||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# द्रौणिकृतं रुद्रस्तोत्रम्

द्रौणिरुवाच ।
उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरम् ।
गिरिशं वरदं देवं भवं भावनमव्ययम् ॥ २॥

शितिकण्ठमजं शक्रं क्रथं क्रतुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३॥

श्मशानवासिनं दृप्तं महागणपतिं प्रभुम् ।
खट्वाङ्गधारिणं मुण्डं जटिलं ब्रह्मचारिणम् ॥ ४॥

मनसाप्यसुचिन्त्येन दुष्करेणाल्पचेतसा ।
सोऽहमात्मोपहारेण यक्ष्ये त्रिपुरघातिनम् ॥ ५॥

स्तुतं स्तुत्यं स्तूयमानममोघं चर्मवाससम् ।
विलोहितं नीलकण्ठमपृक्तं दुर्निवारणम् ॥ ६॥

शुक्रं विश्वसृजं ब्रह्म ब्रह्मचारिणमेव च ।
व्रतवन्तं तपोनित्यमनन्तं तपतां गतिम् ॥ ७॥

बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियम् ।
गणाध्यक्षेक्षितमुखं गौरीहृदयवल्लभम् ॥ ८॥

कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम् ।
तनुवाससमत्युग्रमुमाभूषणतत्परम् ॥ ९॥

परं परेभ्यः परमं परं यस्मान्न विद्यते ।
इष्वस्त्रोत्तमभर्तारं दिगन्तं चैव दक्षिणम् ॥ १०॥

हिरण्यकवचं देवं चन्द्रमौलिविभूषितम् ।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ ११॥

इमां चाप्यापदं घोरां तराम्यद्य सुदुस्तराम् ।

सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् ॥ १२॥

इति महाभारते सौप्तिकपर्वणि ७ अध्यायान्तर्गतं
द्रौणिकृतं रुद्रस्तोत्रं सम्पूर्णम् ।

महाभारत । सौप्तिकपर्व । अध्याय ७/२-११ ॥

mahAbhArata . sauptikaparva . adhyAya 7/2-11..

Proofread by PSA Easwaran

*Draunikritam Rudra Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*